दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णत्रयोदशी
बैशाख ०२ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-173 | 1 | अप्रैल 15, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 २०२७ पर्यन्तं सम्पन्नं भवेत् 'शोंगटोंग-कड़छम' जलविद्युत्-परियोजनायाः प्रथमचरणस्य कार्यम्, मुख्यमन्त्रिणः निर्देशाः

3 नशापाशस्य वर्धमानं जालं सर्वकारस्य संवेदनहीनता च गम्भीरचिन्तायाः विषयः, उत्तरं दद्यात् सर्वकारः - जयरामठाकुरः

4 डॉ. अम्बेडकरेण भारतीयसंविधानस्य रचनां कृत्वा देशः एकसूत्रे बद्धः - डॉ. अतुलवैद्यः

## बिहारराज्यस्य नूतन-मुख्यमन्त्री सम्राट् चौधरी भविष्यति



बिहारे भाजपेतिदलस्य विधायकदलस्य सभायां सम्राट् चौधरी सर्वसम्मत्या निर्वाचितः, येन तस्य मुख्यमन्त्री पदप्राप्तेः मार्गः प्रशस्तः जातः। पटना-नगरे आयोजितायां सभायां केन्द्रीय-पर्यवेक्षकः शिवराज सिंह चौहानः अस्याः घोषणायाः पुष्टिमकरोत्। शीघ्रमेव विधानमण्डलस्य 'सेंट्रल हॉल' इत्यत्र राष्ट्रिय जनतान्त्रिक गठबन्धनस्य विधायकानां संयुक्त-सभायां तस्य नाम्नि अन्तिमा सहमतिः भविष्यति। तदनन्तरं सः 'लोकभवने' प्रशासन-निर्माणाय स्वकीयं कार्यम् उपस्थापयिष्यति। एषः विकासः नीतिश कुमारस्य त्यागपत्रानन्तरं जातः, यः सम्प्रति राज्यसभा सदस्यः अभवत्। तारापुर-क्षेत्रस्य विधायकः सम्राट् चौधरी दलं प्रति कार्तज्ञभावं ज्ञापितवान्। नूतन-मुख्यमन्त्रिणः शपथ-ग्रहण-समारोहः अद्य भविष्यति।

## अशेषे हि देशे वैशाखी, तमिळ नववर्षम् पोहेला-वैशाखः तथा च ओडिया-नववर्षं पारम्परिक-उत्साहेन आचरितम्

अशेषे हि देशे वैशाखी, तमिळ नववर्षम् पोहेला-वैशाखः तथा च ओडिया-नववर्ष पारम्परिक-उत्साहेन आचरितम्। राष्ट्रपतिः द्रौपदी मुर्मूः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् अथ च प्रधानमन्त्री नरेन्द्रमोदी वैसाखी-विषु-विशुव-बोहाग बिहू- पोएली वैशाख-मेषादि-वैशाखादि एवं पुथण्डु इत्येतेषां मङ्गलमयावसरेषु देश-विदेशस्थान् सर्वान् नागरिकान् प्रति शुभाशयान् विस्तारितवन्तः। प्रधानमन्त्री नरेन्द्रमोदी 'उपराष्ट्रपति-भवने' उपराष्ट्रपतिना सी. पी. राधाकृष्णन् वर्येण सह अमिलत्। तत्र तेन तमिळ नववर्षस्य 'पुथुण्डु' पर्वणः अवसरे उपराष्ट्रपतये हार्दिकाः शुभाशयाः विनिवेदिताः।

# नीति-निर्माण-प्रक्रियायां महिलानां सक्रिय-सहभागिता भविष्यति -प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी प्रतिपादितवान् यत् यदा नीति-निर्माण-प्रक्रियायां महिलानां सक्रिय-सहभागिता भविष्यति, तदा निश्चप्रचमेव सप्तचत्वारिंशदुत्तर-द्विसहस्रतमवर्षं यावत् विकसित-भारतस्य निर्माण-लक्ष्यं इतोऽपि सुदृढीभविष्यति। भारतस्य नारी-शक्त्यै लिखिते एकस्मिन् पत्रे श्रीमोदी प्रावोचत् यत् अप्रैल-मासस्य षोडशे दिनाङ्के संसद् तावत् नारी-शक्ति-वन्दनाधिनियमस्य प्रमुखाणां संवैधानिक-संशोधनानां विषये चर्चां करिष्यति। तेन आशा प्रकटिता यत् अयं विधेयकः शीघ्रमेव पारिष्यते। प्रधानमन्त्रिणा विशेषतः उल्लेखितं यत् स्वयं-सहायता समूहाः तथा च लखपति-स्वसारः आत्मनिर्भरतायाः सशक्तम् उदाहरणं प्रस्तुवन्ति। सः अग्रे अवदत् यत् विज्ञान-नवाचार-क्षेत्रेषु अपि महिलानां योगदानं निरन्तरं वर्धमानं वर्तते। नवदेहल्याम् आयोजिते सम्मेलने तेन स्पष्टीकृतं यत् एकोनत्रिंशदधिक-द्विसहस्रतमवर्षस्य लोकसभा-निर्वाचनं महिलारक्षणं समेत्य भविष्यति, तर्हि देशस्य लोकतन्त्रं इतोऽपि दृढः भविष्यति।

## प्रधानमन्त्री नरेन्द्रमोदी देहरादूनतः 'देहली-देहरादून-आर्थिक-वीथेः उद्घाटनम् अकरोत्



प्रधानमन्त्री नरेन्द्रमोदी देहरादूनतः 'देहली-देहरादून-आर्थिक-वीथेः' उद्घाटनम् अकरोत्। इयं आर्थिक-वीथिः प्रमुख-पर्यटन-केन्द्राणां आर्थिक-केन्द्राणां च मध्ये सम्पर्कं सुदृढीकरिष्यति, येन क्षेत्रे व्यापारस्य विकासस्य च नूतनाः अवसराः उत्पद्येरन् । देहली-उत्तरप्रदेश-उत्तराखण्ड-राज्यैः गम्यमाना इयं वीथिका देहली-देहरादून-नगरयोः मध्ये यात्रा-समयं षड्-होरातः न्यूनीकृत्य सार्ध-द्वि-होरामितं करिष्यति। इयं परियोजना वन्यजीवानां सुरक्षां अवधार्य निर्मितास्ति। अत्र तावत् द्वादश-किलोमीटर-परिमिता एलीवेटेड्-वन्यजीव-वीथिः निर्मिता, या च एशिया महाद्वीपस्य दीर्घतम-वीथिषु अन्यतमास्ति। कार्यक्रमात् प्राक् प्रधानमन्त्रिणा सहारनपुर-देहरादून-नगरयोः पथप्रदर्शनेऽपि भागं निर्व्यूढम् ।

## केन्द्रमन्त्री जे. पी. नड्डा तमिळनाडु-राज्यस्य भारतीय-जनतापार्टीकिदलस्य निर्वाचन-सङ्कल्प-पत्रं विमोचितवान्



तमिळनाडु-राज्यस्य चेन्नई नगरे केन्द्रमन्त्री जे. पी. नड्डा भारतीय-जनतापार्टीकिदलस्य निर्वाचन-सङ्कल्प-पत्रं विमोचितवान्। तेन आश्वासितं यत् यदि राष्ट्रिय-जनतान्त्रिक गठबन्धनं सत्तायां आयाति, तर्हि निष्प्रचं प्रत्येकं परिवाराय दशसहस्र रूप्यकाणि, महिलाभ्यः प्रतिमासं द्विसहस्र रूप्यकाणि अपि च प्रतिवर्षं त्रीणि निःशुल्कानि एल.पी.जी. वायु-कोषाणि प्रदास्यन्ते। सङ्कल्प-पत्रे भगवतः मुरुगनस्य उत्सवः 'थाई पूसम्' राजकीय-उत्सवरूपेण घोषयितुं, 'दीपथून्' स्थले दीप-प्रज्वलनस्य परम्परां पुनः स्थापयितुं च वचनं प्रदत्तम्। मादकद्रव्य-निवारणं अपि च शाकानां कृते न्यूनतम समर्थन मूल्यस्य (एमएसपी) वृद्धिः अपि भाजपादलस्य प्राधान्यम् अस्ति। अपि च, महिला उद्यमिनां (एमएसएमई) विकासाय पंचाशत् लक्ष-रूप्यकाणां साहाय्यं दास्यते येन ताः निर्मात्रीत्वेन विकसिताः भूयासुः। अपरपक्षे, पश्चिम-बङ्गाल राज्ये तथा तमिळनाडु-राज्ये विधानसभा-निर्वाचनाय प्रचाराभियानं सम्प्रति चरमोत्कर्षे वर्तते।

## सुभाषितम्

**तृणानि नोन्मूलयति प्रभञ्जनो,**
**मृदूनि नीचैः प्रणतानि सर्वतः।**
**स्वभाव एवोन्नतचेतसामयं,**
**महान्महत्स्वेव करोति विक्रमः॥**

भावार्थः- जिस प्रकार से प्रचण्ड आंधी बड़े बड़े वृक्षों को जड़ से उखाड़ देता है किन्तु छोटे से तृण को नहीं उखाड़ता, उसी प्रकार पराक्रमीजन अपने बराबरी के लोगों पर ही पराक्रम प्रदर्शित करते हैं और निर्बलों पर दया करते हैं।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केता-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भारतस्य संविधानशिल्पिनः डॉ. बी.आर. अम्बेडकरस्य षट्त्रिंशदधिकैकशततमे जयन्ती-महोत्सवे राष्ट्रेण तस्मै श्रद्धाञ्जलिं अर्पिता

भारतस्य संविधानशिल्पिनः डॉ. बी.आर. अम्बेडकरस्य षट्त्रिंशदधिकैकशततमे जयन्ती-महोत्सवे राष्ट्राय तस्मै श्रद्धाञ्जलिं अर्पयति। अवसरेऽस्मिन् देशे सर्वत्र अनेके कार्यक्रमाः आयोजिताः। राष्ट्रपतिः द्रौपदीमुर्मुः गुजरात-राज्यस्य गान्धीनगरस्थे 'लोकभवने' बाबासाहेब डॉ. बी.आर. अम्बेडकरस्य चित्रे पुष्पार्चनं कृत्वा श्रद्धाञ्जलिं अर्पितवती। 'सामाजिक-समरसता-महोत्सवे' भाषमाणा सा राष्ट्रिय-सर्वाङ्गीण विकासाय जाति-धर्म-भेदात् उपरि उत्थाय राष्ट्रिय एकतायाः आह्वानं कृतवती। राष्ट्रपति-महोदया बलं दत्तवती यत् 'समरस-भारतस्य' मार्गः 'समरस-ग्रामेभ्यः' एव आरभते ।

# मुख्यमन्त्रिणा किन्नौरस्य 'टापरी' क्षेत्रे भू-तापीय-ऊर्जा-आधारित-फलशोषक-घटकस्य निरीक्षणं कृतम्



हिमसंस्कृतवार्ताः। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना किन्नौर-जनपदस्य टापरी क्षेत्रे स्थापितायाः विश्वस्य प्रथमायाः 'भू-तापीय-ऊर्जा-सञ्चालितायाः' (Geothermal Energy Driven) सेब-शीतगृह-फलशोषक-संयुक्त-एककम् (Combined Unit) इत्यस्याः निरीक्षणं कृतम्। १,००० टन क्षमतायुक्ता एषा सुविधा 'एच.पी.एम.सी.' (HPMC) तथा आइसलैण्ड-देशस्य एकस्याः कम्पनी-मध्ये जातस्य 'सहमति-ज्ञापनस्य' (MoU) अन्तर्गतं विकसिता अस्ति।मुख्यमन्त्रिणा सूचितं यत् गतद्वयोः वर्षयोः अस्मिन् घटके आहत्य १६,९६३ किलोग्राम् परिमितानि फलानि प्रसंस्कृतानि (Processed) सन्ति। एतेषु ५,१०५ किलोग्राम् फलानि नवम्बर २०२४ तः फरवरी २०२५ पर्यन्तं, तथा च ११,९४८ किलोग्राम् फलानि जून २०२५ तः जनवरी २०२६ पर्यन्तं प्रसंस्कृतानि। सः विश्वासं प्रकटितवान् यत् आगामि-वर्षेषु एषा सुविधा स्थानीय-जनानां कृते अधिका लाभप्रदा सिद्धा भविष्यति। अस्यां प्रणल्यां फलानां भण्डारणाय शोषणाय च भू-तापीय-ऊष्मणः उपयोगः क्रियते।एतत् क्षेत्रं 'तप्त-तापीय-जलस्रोतस्य' (Hot Thermal Spring) कृते अपि ज्ञायते। विद्युत्-निर्भर-पारम्परिक-प्रणालीनां विपरीतम्, एषः घटकः फलानां शोषणाय भू-तापीय-ऊर्जायाः उपयोगं करोति तथा च पर्यावरण-अनुकूल-कृषि-पद्धतिषु कञ्चन नूतनं मानदण्डं स्थापयति।

# २०२७ पर्यन्तं सम्पन्नं भवेत् 'शोंगटोंग-कड़छम' जलविद्युत्-परियोजनायाः प्रथमचरणस्य कार्यम्, मुख्यमन्त्रिणः निर्देशाः



हिमसंस्कृतवार्ताः - रिकांगपिओ। हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः स्वकीय-दिवसद्वयस्य किन्नौर-प्रवासकाले शतद्रु-नद्यां (सतलुज) निर्माणाधीनायाः ४५० मेगावाट क्षमतायाः 'शोंगटोंग-कड़छम' जलविद्युत्-परियोजनायाः प्रगतेः समीक्षां कृतवान्। अस्मिन् अवसरे मुख्यमन्त्री परियोजनायाः 'पावरहाउस', 'सर्ज शाफ्ट' तथा 'बैराज' क्षेत्रस्य निरीक्षणं कृतवान् तथा च उपस्थितैः अधिकारिभिः सह चर्चां अकरोत्। सः सम्बद्ध-विभागाय निर्माणकार्ये तीव्रताम् आनेतुं तथा च परियोजनायाः प्रथमचरणं जनवरी २०२७ पर्यन्तं पूर्णं कर्तुं आदिष्टवान्, येन वर्तमान-वित्तवर्षस्य अन्ते परियोजनायाः कार्यं समाप्तं भवेत्।
मुख्यमन्त्रिणा कथितं यत् वर्तमान-राज्यसर्वकारः स्वच्छ-ऊर्जा-अधोसंरचनां सुदृढं कर्तुं प्रतिबद्धतया कार्यं करोति तथा च हिमाचले 'सतत-विकासस्य' प्रोत्साहने बलं दीयते। सः अवदत् यत् एषा परियोजना राज्यस्य विद्युत्-उत्पादन-क्षमतायाः वर्धने, ऊर्जा-आत्मनिर्भरतायाः विकासे तथा पर्यावरण-अनुकूल-विकासे महत्त्वपूर्णं योगदानं प्रदास्यति। सः उक्तवान् यत् राज्यसर्वकारः विभिन्न-आह्वानानां सत्यपि सुदृढ-निरीक्षण-व्यवस्थया श्रेष्ठ-परियोजना-प्रबन्धनेन च सक्रिय-सहभागितां सुनिश्चितं करोति। स्थल-विशिष्ट-समस्यानां समाधानाय तकनीकी-उपायाः अपि निरन्तरं स्वीक्रियन्ते, येन निर्माणकार्ये गतिः आगता अस्ति।
मुख्यमन्त्रिणा स्पष्टीकृतं यत् सम्प्रति परियोजनायाः प्रायः ७५ प्रतिशतं कार्यं पूर्णं जातम् अस्ति। बैराज (Barrage), हेड रेस टनल (Head Race Tunnel) तथा पावरहाउस (Powerhouse) इत्येतानि प्रमुखानि निर्माणकार्याणि अन्तिमचरणे सन्ति, यदा तु विद्युत्-यान्त्रिक-कार्याणि अपि चरणबद्धरूपेण प्रचलन्ति। सः अवदत् यत् परियोजनायाः पूर्णतायाः अनन्तरं प्रतिवर्षं प्रायः १,५७९ मिलियन यूनिट् विद्युत्-उत्पादनस्य सम्भावना अस्ति, येन राज्यस्य ऊर्जा-क्षमतायां ग्रिड-स्थिरतायां च उल्लेखनीया वृद्धिः भविष्यति। मुख्यमन्त्री अवदत् यत् एषा परियोजना हिमाचलस्य अर्थव्यवस्थायां प्रतिवर्षं प्रायः ९०० कोटिरूप्यकाणां योगदानं प्रदास्यति।

# राजीव गान्धी डे-बोर्डिंग् विद्यालयस्य कृते १० कोटिरूप्यकाणि प्रदास्यन्ते - मुख्यमन्त्री सुक्खूः



हिमसंस्कृतवार्ताः - शिमला। अपरपक्षे, मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना मङ्गलवासरे किन्नौर-जनपदस्य कल्पा क्षेत्रे राजीव गान्धी डे-बोर्डिंग् विद्यालयस्य तथा क्रीडा-छात्रावासस्य निर्माणाधीनभवनस्य निरीक्षणं कृतम्। सः अधिकारिणः निर्दिष्टवान् यत् निर्माणकार्यं त्वरितगत्या पूर्णं करणीयम्। मुख्यमन्त्रिणा कथितं यत् विद्यालयभवनस्य कृते लोकनिर्माणविभागाय १० कोटिरूप्यकाणां अतिरिक्ता राशिः प्रदास्यते।सः विद्यालयपरिसरे एव बालिका-आश्रमस्य भवननिर्माणार्थं २ कोटिरूप्यकाणां घोषणां कृतवान्। मुख्यमन्त्रिणा राजस्वमन्त्री जगतसिंहनेगी वर्यः निर्माणकार्यस्य प्रगतेः निरन्तरं समीक्षां कर्तुं सूचितः। ततः पूर्वं, रिकांगपिओ विश्रामगृहे किन्नौर-जनपदस्य 'पूर्व सैनिक सङ्घस्य' प्रतिनिधिमण्डलेन मुख्यमन्त्रिणा सह मेलनं कृतम्। तेषाम् अभ्यर्थनानुसारं मुख्यमन्त्रिणा सैनिक-विश्रामगृह-भवनस्य निर्माणार्थं २ कोटिरूप्यकाणि भुक्तिं कर्तुं घोषणा कृता। मुख्यमन्त्रिणा रिकांगपिओ-कल्पा विश्रामगृहयोः जनसमस्याः अपि श्रुताः तथा च स्थानीयप्रशासनेन तासां त्वरितसमाधानाय निर्देशाः दत्ताः।

# गोपालपुर-हत्याकाण्डस्य वृत्तान्तः



गोपालपुरे एकः उन्मत्तः युवकः स्वकीयां सनकं पूरयितुं १९ वर्षीयायाः सिया गुलेरिया इत्याख्यायाः कण्ठं कर्तितवान्। आरक्षकदलेन (पुलिस) कृतायां प्रारम्भिक-पृच्छताछायां इदं स्पष्टं जातं यत् यदा अभियुक्तः विकासः महाविद्यालयं गच्छन्तीं बालिकाम् अपश्यत्, तदा सः आत्मनियन्त्रणं त्यक्तवान्। आवेशे आगत्य सः हस्ते गृहीतेन 'दराट' (तीक्ष्णशस्त्रेण) तया उपरि प्रहारं कृतवान्। यदा सिया रक्तप्लावितशरीरेण भूमौ अपतत्, तदा अभियुक्तः भयाक्रान्तः भूत्वा घटनास्थलतः पलायितवान्। आरक्षकदलेन अभियुक्तस्य मुखात् सत्यं निष्कासयितुं प्रथमरात्रौ एव सर्वविधाः उपायाः कृताः। सः अपराधी घटनायाः पूर्वस्य पश्चात् च सर्वं वृत्तान्तं यथावत् कथयति, परन्तु अपराधस्थलस्य (Crime Scene) विषये पृष्टे सति केवलं एतावदेव वदति यत्— "मया बालिका किमर्थं हता, अहं न जानामि।" यदा बालिकायाः तस्याः परिवारस्य च सह कस्यापि पुरातन-शत्रुतायाः विषये पृष्टं, तदापि अभियुक्तः अङ्गीकरोति यत् तादृशं किमपि नासीत्। सः अवदत् यत्— "महाविद्यालयं गच्छन्तीं दृष्ट्वा मया शस्त्रेण प्रहारः कृतः, ततः अहं अधावम्।" बालिकायाः उपरि कति प्रहाराः कृताः, इत्यस्य किमपि स्पष्टं उत्तरं सः न ददाति। आरक्षकाणां पुरतः विकासः स्वकीयं अपराधं स्वीकुर्वन् अस्ति यत्— "मया एव हता।" अभियुक्तस्य एतादृशेन उत्तरेण आरक्षकदलम् अपि चिन्तायां अस्ति। अधुना हत्याकाण्डस्य वास्तविकं कारणं ज्ञातुं आरक्षकाः 'रिमाण्ड' (न्यायिक-अभिरक्षा) समये नूतनपद्धतीनां प्रयोगस्य सज्जतां कुर्वन्ति।

# नशापाशस्य वर्धमानं जालं सर्वकारस्य संवेदनहीनता च गम्भीरचिन्तायाः विषयः, उत्तरं दद्यात् सर्वकारः - जयरामठाकुरः



**हिमसंस्कृतवार्ताः - शिमला।** विपक्षनेता जयरामठाकुरः सरकाघाट-क्षेत्रे १९ वर्षीयायाः छात्रायाः निर्ममहत्यया प्रदेशसर्वकारस्य उपरि तीक्ष्णप्रहारं कुर्वन् अवदत् यत् एषा घटना हिमाचलप्रदेशे शिथिलायाः विधिव्यवस्थायाः प्रशासनिकविफलतायाः च स्पष्टम् उदाहरणम् अस्ति। सः मङ्गलवासरे शिमला-नगरे संवाददातृसम्मेलनं (प्रेस-वार्ताम्) सम्बोधयति स्म। अस्मिन् अवसरे तेन सह भाजपानेता बिहारी लाल शर्मा, शिमला-जनपदाध्यक्षः केशव चौहानः, कर्ण नन्दा इत्यादयः उपस्थिताः आसन्।

पूर्वमुख्यमन्त्री जयरामठाकुरः अवदत् यत् महाविद्यालयं गच्छन्त्याः एकस्याः १९ वर्षीयायाः छात्रायाः उपरि एकेन युवकेन तीक्ष्णशस्त्रेण प्रहारं कृत्वा तस्याः निर्ममहत्या कृता। अनया घटनया सम्पूर्णः प्रदेशः स्तब्धः जातः, सामान्यजनेषु च भयस्य वातावरणं निर्मितम् अस्ति। एषा न काचित् सामान्या घटना, अपितु एतत् सङ्केतः अस्ति यत् प्रदेशे विधिव्यवस्था पूर्णतया विनष्टा अस्ति। कस्यापि मनसि विधानस्य भयं नास्ति।जयरामठाकुरः एतां घटनां नशासमस्यया सह सम्बद्धं कुर्वन् अवदत् यत् अभियुक्तः नशासक्तः आसीत् इति विषयः सम्मुखम् आगच्छति, यत् प्रदेशे वर्धमानं नशाविपदं दर्शयति। सर्वकारः एकतः नशाविरुद्धम् अभियानस्य विश्वासं करोति, अपरतः ईदृशानि प्रकरणानि सम्मुखं आगच्छन्ति। यदि सहस्रशः युनः नशासक्ताः इति चिह्निताः सन्ति, तर्हि तेषां पुनर्वसाय रोधाय च के ठोसाः उपायाः कृताः?

तेन विवरणानाम् उल्लेखं कुर्वन् कथितं यत् गतेषु त्रिषु वर्षेषु प्रदेशे एन.डी.पी.एस. (NDPS) इत्यस्य ६२०० तः अधिकाः प्रकरणाः सम्मुखं आगताः, तथा च ६६ जनानां मृत्युः 'नशा-अतिमात्रायाः' (Overdose) कारणात् अभवत्। एतेन सह महिलानां विरुद्धं अपराधेष्वपि निरन्तरं वृद्धिः जायमाना अस्ति। जयरामठाकुरः सर्वकारस्य संवेदनहीनतायाः विषये अपि प्रश्नं कुर्वन् अवदत् यत् एतादृश्याः बृहत्घटनायाः अनन्तरमपि सर्वकारस्य पक्षतः कोऽपि कठोरः प्रतिभावः न आगतः।

**परिवारस्य सन्देहाः दूरीकरणीयाः**

जयरामठाकुरः असूचयत् यत् सः स्वयं पीडितपरिवारेण सह मिलितवान्, तेषां पीडां च अनुभूतवान्। सः अवदत् यत् छात्रायाः पिता, यः कश्चन निजीवाहनचालकः अस्ति, गम्भीरशोकनिमग्नः सन् न्यायस्य याचनां करोति। पितुः दुःखं शब्देषु वक्तुं न शक्यते। पिता प्रातःकाले एव पुत्र्या सह वार्तालापं कृतवान् आसीत्, कतिपयेभ्यः होराभ्यः अनन्तरमेव तस्याः हत्यायाः सूचनां प्राप्तवान्। यद्यपि अभियुक्तः गृहीतः अस्ति, किन्तु अस्मिन् प्रकरणे गहन-अन्वेषणस्य आवश्यकता वर्तते। इदमपि अन्वेषणीयम् यत् अभियुक्तः एकाकी एव आसीत् अथवा अस्याः हत्यायाः पृष्ठतः कश्चन षड्यन्त्रः अस्ति। प्रत्येकस्य पक्षस्य गम्भीरतया अन्वेषणं भवेत्।

# उच्चतम न्यायालयस्य निर्णयः-: शासकीयसेवासु समानतायाः अधिकारस्य पालनम् अनिवार्यम्



उच्चतम न्यायालयः एकस्यां महत्वपूर्णायां टिप्पण्याम् उक्तवान् यत् यदि सेवा-नियमेषु अनुभव-योग्यता-ज्येष्ठतानाम् (वरिष्ठता) आधारेण अपकर्ष-प्रावधानं वर्तते, तर्हि कश्चन कर्मचारी केवलं स्नातकपदव्याः (Degree) अभावात् पदोन्नत्याः (Promotion) वञ्चितः कर्तुं न शक्यते। उच्चतमन्यायालयः मध्यप्रदेश-उच्च-न्यायालयस्य तं निर्णयं निरस्तवान्, यस्मिन् एकस्याः सहकारी-समित्याः कर्मचारिणे पदोन्नतिं दातुं निराकृतम् आसीत्। न्यायालयस्य मतेन यदा अन्येभ्यः कर्मचारिभ्यः समानः अपकर्षः (छूट) प्रदत्तः, तर्हि अस्मिन् प्रकरणे शैक्षिक-योग्यतायाम् अपकर्षं न प्रदानं संविधानस्य अनुच्छेद १४ तथा १६ इत्यनयोः उल्लंघनम् अस्ति। न्यायमूर्तिः प्रशान्त कुमारमिश्रः तथा न्यायमूर्तिः एन.वी. अंजारिया इत्यनयोः पीठेन उक्तं यत्— 'भेदभावः अन्यायस्यैव अपरं नाम अस्ति।' न्यायालयेन बलं दत्तं यत् शासकीयसेवासु समानतायाः अधिकारस्य अनुपालनं अनिवार्यम् अस्ति।

# वैश्विक-अनिश्चिततायाः अनन्तरमपि भारतस्य विकास-सम्भावनाः सुदृढाः : आईएमएफ (IMF)

अन्तर्राष्ट्रीय-मुद्रा-कोषस्य (IMF) मुख्य-अर्थशास्त्री पियरे ओलिवियर गौरिंचास महोदयः उक्तवान् यत् पश्चिम-एशिया-सङ्घर्षकारणात् वैश्विक-अनिश्चिततायां वृद्धौ सत्यामपि भारतस्य विकास-सम्भावनाः सुदृढाः वर्तन्ते।

माध्यमैः सह वार्तालापं कुर्वन् गौरिंचासः अवदत् यत् भारतेन २०२५ तमे वर्षे उत्तमं प्रदर्शनं कृतम्, येन विकासदरः ७.६ प्रतिशतं भविष्यति इति अनुमानम्



अस्ति। २०२६ तमे वर्षे एषः दरः प्रायः ६.५ प्रतिशतं भवितुम् अर्हति।तथापि सः चेतावनीं दत्तवान् यत् वैश्विक-ऊर्जा-मूल्येषु वृद्धेः तथा खाद्यपदार्थानां वर्धमान-व्ययस्य कारणात् २०२६ तमे वर्षे मुद्रास्फीतिः (Inflation) प्रवर्ध्य प्रायः ४.७ प्रतिशतं भवितुं शक्नोति।



# कर्मचारिभ्यः महार्घतावृत्तेः आशा, मुख्यमन्त्री सुक्खुः कर्तुं शक्नोति घोषणाम्

**हिमसंस्कृतवार्ताः - शिमला।** किन्नौर-जनपदस्य रिकांगपिओ क्षेत्रे बुधवासरे आयोज्यमाने राज्यस्तरीय-हिमाचल-दिवस-समारोहे कर्मचारिणः मुख्यमन्त्रिणः सकाशात् महतीं आशां धारयन्ति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः कार्यक्रमस्य अध्यक्षतां करिष्यति। कर्मचारिणः पेन्शनभोगिनश्च मुख्यमन्त्रिणः डी.ए. (DA) इत्यस्य प्रतीक्षां कुर्वन्ति, यतोहि तेषां १३ प्रतिशतं महार्घता-वृत्तिः (महंगाई भत्ता) लम्बिता वर्तते। मुख्यमन्त्रिणा आयव्ययके (Budget) कर्मचारिणां कृते पूर्वमेव घोषणा कृता अस्ति। आयव्ययके दैनिकवेतनं वर्धयित्वा प्रतिदिनं ४५० रूप्यकाणि कृतम् अस्ति।

'आउटसोर्स' (Outsource) कर्मचारिणां कृते न्यूनतमवेतनं १३,७५० रूप्यकाणि घोषितम् अस्ति। हिमाचल-दिवसस्य अवसरे मुख्यमन्त्री दैनिकवेतनवृद्धेः घोषणाम् अपि कर्तुं शक्नोति। एतेन सह, १-१-२०१६ तः ३१ दिसम्बर २०२१ पर्यन्तं सेवानिवृत्तानां चतुर्थश्रेणीकर्मचारिणां कृते अवशिष्ट-ग्रेच्युटी (Gratuity) तथा 'लीव-इन-कैशमेण्ट' इत्यनयोः भुक्त्याः, तथा च 'अध्ययनावकाशस्य' (Study Leave) उपरि गच्छतां कर्मचारिणां कृते १०० प्रतिशतं वेतनप्रदानस्य घोषणाम् अपि सः कर्तुं शक्नोति। अराजपत्रित-कर्मचारि-महासङ्घस्य अध्यक्षः त्रिलोक ठाकुरः अवदत् यत् मुख्यमन्त्री हिमाचल-दिवसस्य अवसरे कर्मचारिभ्यः निश्चितरूपेण किमपि प्रदास्यति। हिमाचलस्य कर्मचारीवर्गः पेन्शनभोगिनश्च आशान्विताः सन्ति।

# अद्य हिमाचल-दिवसः, १५ विभूतयः सम्मानिताः भविष्यन्ति

हिमाचल-दिवसस्य राज्यस्तरीयः कार्यक्रमः बुधवासरे किन्नौर-जनपदस्य रिकांगपिओ स्थित 'मिनी-स्टेडियम' मध्ये भविष्यति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः पूर्वाह्णे ११ वादने राष्ट्रध्वजमुत्तोल्य समारोहस्य शुभारम्भं करिष्यति। अस्मिनवसरे जनपदस्य जनाः पर्यटनसहिताः अन्याः योजनाः निरीक्षन्ते, तत्रैव प्रदेशस्य कर्मचारिणः महार्घता-वृत्तेः आशां कुर्वन्ति। समारोहकाले एतेषां 'हिमाचलगौरवः' इति पुरस्कारेण सम्मानं भविष्यतिः

- डॉ. बृज शर्माः प्राचार्यः, अटल इंस्टीट्यूट ऑफ मेडिकल सुपर स्पेशलिटी चमियाणा।
- पद्मश्री प्रेम लाल गौतमः कृषि-वैज्ञानिकः।
- डॉ. ओ.पी. शर्माः वरिष्ठ-साहित्यकारः।
- स्नेहलताः हस्तकन्दुक (Handball) प्रशिक्षिका, मोरसिंघी (बिलासपुरम्)।

**अन्ये पुरस्काराः**-सिविल सर्विस अवार्डः मण्डी-जनपद-प्रशासनं (उपायुक्तः अपूर्व देवगनः), डिजिटल-टेक्नोलॉजी एवं गवर्नेंस विभागः, तथा स्मृतिका नेगी (SDM बल्ह)।

प्रेरणा स्रोत सम्मानम् - चारू शर्मा (शिमला) तथा कुमारी छोंजिन अंगमो (किन्नौर)।

महिला कबड्डी दलम्: विश्वविजेतृ-दलस्य सदस्याः रितु नेगी, साक्षी शर्मा, पुष्पा, भावना देवी, चम्पा ठाकुर च सम्मानिताः भविष्यन्ति।

# डॉ. अम्बेडकरेण भारतीयसंविधानस्य रचनां कृत्वा देशः एकसूत्रे बद्धः - डॉ. अतुलवैद्यः



**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, नागपुरम्।**
कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य मुख्यालयस्थित-अतिथिगृह-सभागारे भारतरत्न-डॉ. बाबासाहेब-अम्बेडकरस्य जयन्ती सोत्साहं मानिता। अस्मिन् अवसरे कुलगुरुः डॉ. अतुलवैद्यः, कुलसचिवः डॉ. रोशन अलोने, अधिष्ठातारः प्रो. कविता होले, प्रो. हरेकृष्ण अगस्ती तथा प्रो. कलापिनी अगस्ती, विभागप्रमुखा प्रो. कीर्ती सदार, प्रो. राजश्री मेश्राम, वित्ताधिकारी श्री विजयेंद्रः पाण्डे, परीक्षा-नियन्त्रकः डॉ. केशव मोहरीरः, राष्ट्रिय-सेवा-योजना-सञ्चालकः डॉ. जयवन्तचौधरी इत्येतैः सह सर्वैः कर्मयोगिभिः डॉ. बाबासाहेब-अम्बेडकरस्य प्रतिमायां पुष्पाञ्जलिं समर्प्य सप्रणामं नमनं कृतम्।
अस्मिनवसरे राष्ट्रिय-सेवा-योजनायाः सञ्चालकस्य डॉ. जयवन्त-चौधरिणः मार्गदर्शने छात्रैः मराठी-संस्कृतभाषयोः सज्जीकृतस्य 'संविधान-प्रस्तावनायाः' उद्घाटनं कुलगुरुणा डॉ. अतुल-वैद्यमहोदयेन स्वकरकमलैः कृतम्। तदनन्तरं सर्वैः उपस्थितैः प्रस्तावनायाः सामूहिकं वाचनं कृतम्।स्वकीय-सम्बोधने डॉ. अतुल वैद्यः आधुनिकभारतस्य निर्माणे डॉ. बाबासाहेब-अम्बेडकरस्य अतुलनीययोगदानस्य उपरि प्रकाशं चिक्षेप। सः भारतीयसंविधानस्य रचना, निरन्तरा ज्ञानसाधना, वञ्चितवर्गाणां मुख्यधारायाम् आनयनाय कृतानि कार्याणि तथा च संस्कृतं राष्ट्रभाषां कर्तुं तस्य आग्रहस्य विशेषोल्लेखं कृतवान्। "शिक्षिताः भवत" इति सन्देशेन सह 'वाचाल तर वाचाल' अर्थात् पठिष्यसि तर्हि तरिष्यसि इति मन्त्रेण डॉ. अम्बेडकरः शिक्षायाः महत्त्वं रेखाङ्कितवान्। तेन स्पष्टीकृतं यत् शिक्षया विना मानवस्य उत्थानं सम्भवं नास्ति। ज्ञानसाधनया सामाजिक-उत्तरदायित्वेन च सः समाजोत्थानस्य महान् कार्यं कृतवान्। भारतीयसंविधानस्य निर्माणद्वारा सः देशस्य सर्वान् धर्मान्, जातीः, पंथान् च एकसूत्रे ग्रन्थितवान्।
राष्ट्रिय-सेवा-योजनायाः अन्तर्गतं डॉ. बाबासाहेब-अम्बेडकर-जयन्त्याः अवसरे निबन्धलेखन-प्रश्नोत्तरी-काव्यलेखन-प्रतियोगितानां तथा च एकस्य विशेषव्याख्यानस्य आयोजनं कृतमस्ति।
कार्यक्रमे विश्वविद्यालयस्य प्राध्यापकाः, प्रशासनिक-अधिकारिणः, कर्मचारिणश्च महत्यां सङ्ख्यायाम् उपस्थिताः आसन्। एषः कार्यक्रमः जनसम्पर्क-प्रकोष्ठेण आयोजितः।



# संस्कृतं मधुरं सदा-२७

भारतस्य सनातनधर्मस्य वा वेदज्योतिः हि प्राणवन्मुख्यं धनरत्नमस्ति। अपौरुषेयं धनमिदं सर्वदा प्राणवद्रक्षणीयं सनातनिभिः। वेदः न केवलं धनरत्नमेव अपि तु धर्मसंस्कृतिदेशादिकस्य रक्षणस्य मुख्यम् आधारभूतम् अस्त्रमस्ति। ब्रह्मतत्त्वस्य प्रकाशकः चास्ति वेदोऽयम्। परमविज्ञानमस्ति।
'सर्वं खल्विदं ब्रह्म' इत्यर्थात् निश्चयपूर्वकं हि एतत्सर्वं ब्रह्म वर्तते इति। भगवत्सृष्टितले सर्वान् समानान् विज्ञाय सर्वैः सह मर्यादापूर्वकं निक्षिप्ता समदृष्टिः नाम हि सर्वोपरि ज्ञानम्, संस्कृतेः उत्तमरूपं वा कथ्यते। एतस्य भावस्य संरक्षणार्थं हि वेदेषु नानासंस्काराः विहिताः सन्ति। एतदेव साम्यवादस्य सत्यस्वरूपमपि वर्तते। यजुर्वेदे एवमुक्तमस्ति- "ओ३म् इषे त्वोर्जे त्वा, वायव स्थ, देवो वः सविता प्रार्पयतु, श्रेष्ठतमाय कर्मण आप्यायध्वम्, अघ्न्याऽ इन्द्राय भागं, प्रजावतीः अनमीवाऽअयक्ष्मा मा व स्तेनऽईशत माऽघशंं सः ध्रुवा अस्मिन् गोपतौ स्यात्, बह्वीर्यजमानस्य पशून् पाहि।" इति।
आशयो यत्- 'हे परमेश्वरः! अहं त्वां ब्रह्मतत्त्वार्थं, विवेकार्थं च प्रार्थये; पर्याप्तवर्षार्थम्, अन्नार्थञ्च प्रार्थये; सुप्रजार्थम्, अभ्युदयार्थञ्च प्रार्थये; सत्वाधिकारार्थम्, उत्कृष्ट-सदाचारार्थञ्च त्वां प्रार्थये, यतोहि त्वं सर्वत्र गमनशीलः, सर्वेषां चिन्तकः चासि। सर्वेषाम् उत्पादक हे देव! श्रेष्ठकर्मार्थं प्रेरय। इन्द्रस्य भागम् इन्द्रियाणि प्राप्नुयुः, कृषिहेत्वर्थं गवाम्, एवं सुखहेत्वर्थं ज्ञानस्य वर्धनं भवेत्। ईश्वरकृपया गावः, स्त्रियः, बुद्धयः, प्रजावतीः इत्येते क्षयादिरोगरहिताः भवन्तु, एतेषामुपरि चौराणां, दुष्टजनानां च अधिकारो मास्तु कदाचिदपि। हे परमेश्वर! तव स्वामित्वे सर्वे प्राणिनः अचलाः, निर्भयाः, सुरक्षिताः च सन्तु।"
अतो वेदो हि मनुष्यमात्रस्य कृते कश्चन महान् संस्कारप्रदः, सुसंस्कृतिप्रदः, विवेकप्रदः, जीवनस्य परम- पाथेयस्वरूपो मार्गदर्शको ग्रन्थो वर्तते, यश्च सम्यक् अध्येतव्यः, ज्ञातव्यश्च इति, शुभम्।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमो नमः नन्दिनि। अद्य एका अतीव विचित्रा वार्ता श्रुता। बेङ्गलूरु-नगरे मार्जारशावकानां "भरणपोषण-धनार्थं" कश्चन विवादः जातः। एका महिला पुं-मार्जारस्य स्वामिनं भोजनस्य औषधस्य च व्ययार्थं धनं याचितवती अस्ति। तत्र आरक्षकैः मध्यस्थता कृता।
**नन्दिनी-** मार्जाराणां कृते आरक्षकाः आहूताः, एतत् अतीव हास्यास्पदम्। द्वितीया वार्ता - अमेरिका-देशस्य एकेन मुख्य-प्रबन्धकेन स्वामिनः व्यवहारस्य विषये 'रक्त-सङ्केतः' प्रदर्शितः। तेन उक्तं यत् यः स्वामी कर्मकरेषु विश्वासं न करोति सः सर्वथा हानिकारकः।
**काव्या-** सत्यम्, स्वामिनः विश्वासः कर्मकरेषु उत्साहं वर्धयति। इदानीं शिमला-नगरस्य सुखद-वार्तां पश्यतु। एकेन तन्त्रांश-अभियन्त्रा गृह-कार्य-अवसरे स्व-गृहस्य छदिर्भागे नील-पृषत-फलानां महद् उद्यानम् उत्पादितम्। तेन नूतनः मार्गः प्रदर्शितः।
**नन्दिनी-** तस्य कृषि-कार्यं प्रशंसनीयम्, किन्तु अन्यत्र फलम् अति-न्यूनम्। देहली-नगरस्य एकः तन्त्रांशज्ञः वेतनवृद्ध्या खिन्नीभूतः अस्ति। तस्य वेतनवृद्धिः नव-रूप्यक-मिता अभूत्। तेन एतत् प्रहसनम् इव अनुभूतम्।

# नोएडा-प्रदर्शनम् -: श्रमिकाणाम अन्तिमा अभियाचना, राहुल गान्धी महोदयः श्रमिकाणां समर्थनं कृतवान्



कांग्रेस-दलस्य पूर्व-अध्यक्षः राहुल गान्धी महोदयः नोएडा-नगरे श्रमिकाणां वेतनवृद्धये कृतम् आन्दोलनं न्याय्यं मन्यमानः उक्तवान् यत्— "आकाशस्पर्शिण्याः मूल्यवृद्धेः (महंगाई) काले वेतनवृद्धि-याचना सर्वथा युक्तिसङ्गता अस्ति, एतस्याम् अभियाचनायां संवेदनशीलतापूर्वकं ध्यानं दातव्यम्।"मङ्गलवासरे सामाजिक-माध्यमे 'X' (पूर्वं ट्विटर) इत्यत्र श्रीगान्धी महोदयः नोएडा-नगरस्य अनेकासु कम्पनीषु सोमवासरे श्रमिकाणां वेतनवृद्धये कृतस्य आन्दोलनस्य समर्थनं कृतवान्। सः अवदत् यत् यथा मूल्यवृद्धिः वर्धमाना अस्ति, तथा तेषां 'न्यूनतमं वेतनम्' अपि वर्धनीयम्। कांग्रेस-नेतुः मते सोमवासरे नोएडा-नगरस्य मार्गेषु यत् किमपि अभवत्, सा अस्य देशस्य श्रमिकाणाम् 'अन्तिमा अभियाचना' आसीत्। एतादृशः स्वरः यः दीर्घकालात् अनश्रुतः कृतः, यः याचनां कुर्वन् श्रान्तः जातः। नोएडा-नगरे कार्यं कुर्वतः एकस्य श्रमिकस्य १२,००० रूप्यकाणां मासिक-आये प्रायः ४,००० तः ७,००० रूप्यकाणि केवलं गृहभाटके (किराये) एव व्ययितानि भवन्ति।